|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## અથ સૂર્ય મંત્ર:>

ઓં અસ્ય શ્રી સૂર્ય મહામંત્રસ્ય હિરણ્યસ્તૂપ ઋષિ:| ત્રિષ્ટુપ્છંદઃ સૂર્યો દેવતા| ઘ્રીં બીજં| ણીં શક્તિ:| સૂં કીલકં| મમ સૂર્ય પ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગ:|| (કરન્યાસ:) સૂર્યાય અંગુષ્ઠાભ્યાં નમ:| તેજોમૂર્તયે તર્જનીભ્યાં નમ:| વરદાય મધ્યમાભ્યાં નમ:| હંસાય અનામિકાભ્યાં નમ:| શાંતાય કનિષ્ઠિકાભ્યાં નમ:| કર્મસાક્ષિણે કરતલકરપૃષ્ઠાભ્યાં નમ:|| (અંગન્યાસ:) સૂર્યાય હૃદયાય નમ:| તેજોમૂર્તયે શિરસે સ્વાહા| વરદાય શિખાયૈ વષટ્| હંસાય કવચાય હું| શાંતાય નેત્રત્રયાય વૌષટ્| કર્મસાક્ષિણે અસ્ત્રાય ફટ્| ભૂર્ભુવસ્સુવરોમિતિ દિગ્બંધ:|| (ધ્યાનં) દ્વિભુજં પદ્મહસ્તં ચ વરદં મકુટાન્વિત:| ધ્યાયેદ્દિવાકરં દેવં સર્વાભીષ્ટ પ્રદાયકં|| (લમિત્યાદિ પંચ પૂજા) ઓં લં પૃથ્વિતત્વાત્મને ગંધાન્ધારયામિ| ઓં હં આકાશતત્વાત્મને પુષ્પં સમર્પયામિ| ઓં યં વાયુતત્વાત્મને ધૂપમાઘ્રાપયામિ| ઓં રં વહ્નિતત્વાત્મને દીપન્દર્શયામિ| ઓં વં અમૃતતત્વાત્મને અમૃતનૈવેદ્યં સમર્પયામિ| સર્વતત્વાત્મને સર્વોપચાર પૂજાં સમર્પયામિ|| આસત્યેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યં ચ| હિરણ્યયેન સવિતારથેનાદેવો યાતિ ભુવના વિપશ્યન્| ઇતિ સૂર્ય મંત્ર:||

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com